श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः

श्रीब्रह्मपुराणे ब्रह्मनारदसंवादे

# ॥ श्री नृसिंहद्वादशनामस्तोत्रम् ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

## श्री रङ्गरामानुज महादेशिकन्

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्री नृसिंहद्वादशनामस्तोत्रम् ॥

अस्य श्रीनृसिंहद्वादशनामस्तोत्रमहामन्त्रस्य
वेदव्यासो भगवान् ऋषिः
अनुष्टुप् छन्दः
श्रीलक्ष्मीनृसिंहो देवता
श्रीलक्ष्मीनृसिंहप्रीत्यर्थे जपे विनियोगः ॥

प्रथमं तु महाज्वालो द्वितीयं तूग्रकेसरी।
तृतीयं वज्रदंष्ट्रश्च चतुर्थं तु विशारदः ॥ 1 ॥

पञ्चमं नारसिंहश्च षष्ठः कश्यपमर्दनः।
सप्तमो यातुहन्ता च अष्टमो देववल्लभः ॥ 2 ॥

नव प्रह्लादवरदो दशमोऽनन्तहस्तकः।
एकादशो महारुद्रो द्वादशो दारुणस्तथा ॥ 3 ॥

द्वादशैतानि नामानि नृसिंहस्य महात्मनः।
मन्त्रराजेति विख्यातं सर्वपापविनाशनम् ॥ 4 ॥

क्षयापस्मारकुष्ठादितापज्वरनिवारणम्।
राजद्वारे महाघोरे सङ्ग्रामे च जलान्तरे ॥ 5 ॥

गिरिगह्वर आरण्ये व्याघ्रचोरामयादिषु।
रणे च मरणे चैव शमदं परमं शुभम् ॥ 6 ॥

शतमावर्तयेद्यस्तु मुच्यते व्याधिबन्धनात्।
आवर्तयेत्सहस्रं तु लभते वाञ्छितं फलम्॥ 7॥

॥ इति श्री नृसिंहद्वादशनामस्तोत्रं समाप्तम्॥